**संस्कृतवार्ताः**

**दिनाङ्क :-16.10.2025**

**प्रातः - 06:55**

**प्रधानमंत्री-आन्ध्रप्रदेश**

**प्रधानमन्त्री नरेन्द्रमोदी अद्य आन्ध्रप्रदेशस्य यात्रायां भविष्यति। भ्रमणावधौ सः नन्दयाल-जनपदस्य श्रीशैलम-स्थितस्य श्री-भ्रमराम्बा-मल्लिकार्जुन-स्वामी-वरला-देवस्थानम् इत्यत्र पूजां दर्शनं च करिष्यति। सः श्रीशैलं-नगरस्य श्री-शिवाजी-स्पूर्ति-केन्द्रम् अपि गमिष्यति। प्रधानमन्त्री अपराह्णे कुर्नूलनगरे प्रायः त्रिंशोत्तर-चतुःशताधिक-त्रयोदश-सहस्र-कोटि-रूप्यकाणां बहुविधविकासपरियोजनानां उद्घाटनम्, शिलान्यासं, राष्ट्राय समर्पणं च करिष्यति। एताः परियोजनाः उद्योग, विद्युत, मार्ग, रेलमार्ग, रक्षा-विनिर्माण, पेट्रोलियम-प्राकृतिक इन्धनादि क्षेत्रेषु च विस्तृताः सन्ति। अस्मिन् अवसरे श्रीमोदी एकां सार्वजनिक-सभाम् अपि सम्बोधयिष्यति।**

**मोदी-बिहार-प्रचारः**

**राज्यविधानसभानिर्वाचनात् पूर्वं बिहारराज्ये प्रचारस्य गतिः वर्धिता अस्ति। भारतीय-जनता-पार्टीति दलस्य वरिष्ठः नेता तथा प्रधानमन्त्री नरेन्द्रमोदी ह्यः बिहार-निर्वाचनाय भाजपा-बूथ-स्तरस्य कार्यकर्तृभिः सह संवाद-सत्रेण स्वकीयस्य दलस्य प्रचारस्य आरम्भमकरोत्। सः 'मेरा बूथ् सबसे मजबूत्' इत्येतस्मिन् कार्यक्रमे कार्यकर्तृभिः सह वार्तालापम् अकरोत्। संवादस्य समये, श्रीमोदी सर्वेभ्यः बूथ्-कार्यकर्तृभ्यः स्वक्षेत्रेषु प्रत्येकं कुटुम्बं विविध-सर्वकारीय-योजनानां लाभानां विषये सूचयन्तु इति उक्तवान्। सः दृढविश्वासं प्रकटितवान् यत् बिहारस्य महिलाः नवम्बर्-मासस्य चतुर्दश दिनाङ्के एन्. डी. ए-पक्षस्य विजयानन्तरं पुनः दीपावली सुनिश्चेतुं महत्त्वपूर्णां भूमिकां निर्वहिस्यन्ति । प्रधानमन्त्री अवदत् यत् राज्ये एन्. डी. ए-सर्वकारेण सद्यः एव आरब्धया महिला-रोजगार-योजनया बिहारराज्यस्य महिलाः प्रसन्नाः सन्ति इति।**

**भाजपा-तृतीय सूची**

**भारतीय-जनता-पार्टीति दलेन बिहारविधानसभानिर्वाचनाय अष्टादश प्रत्याशिनां तृतीया सूची प्रकाशिता। नर-कटियागञ्ज्-क्षेत्रात् सञ्जय् पाण्डे, चनपटिया-क्षेत्रात् उमाकान्त् सिंहः, चिरैया-क्षेत्रात् लालबाबु प्रसाद् गुप्ता च नैर्वाचनिक-समरांगणे अस्ति। कोचाधामन्-क्षेत्रात् बीनादेवी, राघोपुर्-क्षेत्रात् सतीशकुमार्-यादवः, पीरपैन्ती-क्षेत्रात् मुरारी पासवानः च स्पर्धिस्यति। एतैः सह दलेन एकाधिकैकशत क्षेत्राणां कृते प्रत्याशिनां घोषणा कृता।**

-

## उत्तररेलवे-उत्सव:

उत्तररेलवे विभागः अस्मिन् वर्षे दीपावल्याः छठ्-पूजायाः च अवसरे उत्सवस्य आवश्यकतां पूरयितुं एकसहस्राधिकानि अतिरिक्तानि विशिष्ट-रेलयानानि चालयति। नवदिल्ल्यां वार्ताहरान् सम्बोधयन्, उत्तररेलवे विभागस्य महाप्रबन्धकः अशोककुमारवर्मा अवदत् यत्, चतुर्विंशति होरा पर्यन्तं निरीक्षणं सुनिश्चीय, कार्यक्षमता प्रबन्धनाय समर्पितः नियन्त्रण-कक्षः स्थापितः अस्ति इति।

## गृहमंत्रालय-नक्सलवाद

सर्वकारः अवदत् यत् नक्सलवादेन सर्वाधिकप्रभावितानां मण्डलानां सङ्ख्या षट्-तः त्रीणि अभवत्। अधुना केवलं छत्तीसगढस्य बीजापुर-सुकमा-नारायणपुर-मण्डलानि एव वामपक्ष-उग्रवादेन सर्वाधिकप्रभावितानि सन्ति। एकस्मिन् वक्तव्ये, गृहमन्त्रालयः अकथयत् यत् एतत् नरेन्द्रमोदी-प्रशासनस्य नक्सल्-मुक्तभारतस्य निर्माणस्य दृढनिश्चयस्य दिशि बृहत्प्रगतिं प्रदर्शयति। मन्त्रालयः अवदत् यत्, षड्विंशत्यधिक द्विसहस्रतम वर्षस्य मार्च्-मासस्य एकत्रिंशत् दिनाङ्कपर्यन्तं नक्सल्-उपद्रवं पूर्णतया उन्मूलनाय सर्वकारः प्रतिबद्धः अस्तीति। इतः पूर्वं महाराष्ट्रस्य गड्चिरोली-मण्डले एकषष्ठी नक्सलवादिनः, छत्तीसगढस्य सुकमा-मण्डले सप्तविंशति माओवादिनः च आत्मसमर्पणं कृतवन्तः।

## श्रीलङ्का-प्रधानमंत्री

श्रीलङ्का-देशस्य प्रधानमन्त्री हरिणी अमरसूर्या इत्येषा अद्यारभ्य द्विदिवसीय-आधिकारिकयात्रायै भारतं आगमिष्यति, पदग्रहणानन्तरम् इदं तस्याः प्रथमा यात्रा भविष्यति । अक्टूबर्-मासस्य अष्टादश दिनाङ्कपर्यन्तं भारत यात्रावाधौ अमरसूर्या वर्या वरिष्ठ-राजनेतृभिः सह मिलित्वा प्रमुखेषु द्वैपाक्षिकविषयेषु, बहुविधक्षेत्रेषु सहयोगं सुदृढं कर्तुं च चर्चां करिष्यति।